श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकाधिकशततमः सर्गः ॥

**श्रीरामस्य विलापो हनुमदाहृतयौषध्या सुषेणप्रयुक्तया लक्ष्मणस्य संज्ञालाभः**

शक्त्या निपातितं दृष्ट्वा रावणेन बलीयसा।
लक्ष्मणं समरे शूरं शोणितौघपरिप्लुतम् ॥ **6.101.1** ॥

स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्मनः।
विसृजन्नेव बाणौघान् सुषेणमिदमब्रवीत् ॥ **6.101.2** ॥

एष रावणवीर्येण लक्ष्मणः पतितो भुवि।
सर्पवच्चेष्टते वीरो मम शोकमुदीरयन् ॥ **6.101.3** ॥

शोणितार्द्रमिमं वीरं प्राणैः प्रियतरं मम।
पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥ **6.101.4** ॥

अयं स समरश्लाघी भ्राता मे शुभलक्षणः।
यदि पञ्चत्वमापन्नः प्राणैर्मे किं सखेन वा ॥ **6.101.5** ॥

लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद् धनुः।
सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता ॥ **6.101.6** ॥

अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव।
चिन्ता मे वर्धते तीव्रा मुमूर्षापि च जायते ॥ **6.101.7** ॥

भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना।
विष्टनन्तं तु दुःखार्तं मर्मण्यभिहतं भृशम्॥ **6.101.8** ॥

राघवो भ्रातरं दृष्ट्वा प्रियं प्राणं बहिश्चरम्।
दुःखेन महताविष्टो ध्यानशोकपरायणः॥ **6.101.9** ॥

परं विषादमापन्नो विललापाकुलेन्द्रियः।
भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु॥ **6.101.10** ॥

विजयोऽपि हि मे शूर न प्रियायोपकल्पते।
अचक्षुर्विषयश्चन्द्रः कां प्रीतिं जनयिष्यति॥ **6.101.11** ॥

किं मे युद्धेन किं प्राणैर्युद्धकार्यं न विद्यते।
यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः॥ **6.101.12** ॥

यथैव मां वनं यान्तमनुयाति महाद्युतिः।
अहमप्यनुयास्यामि तथैवैनं यमक्षयम्॥ **6.101.13** ॥

इष्टबन्धुजनो नित्यं मां स नित्यमनुव्रतः।
इमामवस्थां गमितो राक्षसैः कूटयोधिभिः॥ **6.101.14** ॥

देशे देशे कलत्राणि देशे देशे च बान्धवाः।
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥ **6.101.15** ॥

किं नु राज्येन दुर्धर्षलक्ष्मणेन विना मम।
कथं वक्ष्याम्यहं त्वम्बां सुमित्रां पुत्रवत्सलाम्॥ **6.101.16** ॥

उपालम्भं न शक्ष्यामि सोढुं दत्तं सुमित्रया।
किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम्॥ **6.101.17** ॥

भरतं किं नु वक्ष्यामि शत्रुघ्नं च महाबलम्।
सह तेन वनं यातो विना तेनागतः कथम्॥ **6.101.18** ॥

इहैव मरणं श्रेयो न तु बन्धुविगर्हणम्।
किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि ॥ **6.101.19** ॥

येन मे धार्मिको भ्राता निहतश्चाग्रतः स्थितः।
हा भ्रातर्मनुजश्रेष्ठ शूराणां प्रवर प्रभो ॥ **6.101.20** ॥

एकाकी किं नु मां त्यक्त्वा परलोकाय गच्छसि।
विलपन्तं च मां भ्रातः किमर्थं नावभाषसे ॥ **6.101.21** ॥

उत्तिष्ठ पश्य किं शेषे दीनं मां पश्य चक्षुषा।
शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च ॥ **6.101.22** ॥

विषण्णस्य महाबाहो समाश्वासयिता मम।
राममेवं ब्रुवाणं तु शोकव्याकुलितेन्द्रियम् ॥ **6.101.23** ॥

आश्वासयन्नुवाचेदं सुषेणः परमं वचः।
त्यजेमां नरशार्दूल बुद्धिं वैक्लव्यकारिणीम् ॥ **6.101.24** ॥

शोकसञ्जननीं चिन्तां तुल्यां बाणैश्चमूमुखे।
नैव पञ्चत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः ॥ **6.101.25** ॥

नह्यस्य विकृतं वक्त्रं न च श्यामत्वमागतम्।
सुप्रभं च प्रसन्नं च मुखमस्य निरीक्ष्यताम् ॥ **6.101.26** ॥

पद्मपत्रतलौ हस्तौ सुप्रसन्ने च लोचने।
नेदृशं दृश्यते रूपं गतासूनां विशाम्पते ॥ **6.101.27** ॥

विषादं मा कृथा वीर सप्राणोऽयमरिन्दम।
आख्याति तु प्रसुप्तस्य स्रस्तगात्रस्य भूतले ॥ **6.101.28** ॥

सोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः।
एवमुक्त्वा महाप्राज्ञः सुषेणो राघवं वचः ॥ **6.101.29** ॥

समीपस्थमुवाचेदं हनूमन्तं महाकपिम्।
सौम्य शीघ्रमितो गत्वा पर्वतं हि महोदयम्॥ **6.101.30** ॥

पूर्वं तु कथितो योऽसौ वीर जाम्बवता तव।
दक्षिणे शिखरे जातां महौषधिमिहानय॥ **6.101.31** ॥

विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा।
सञ्जीवकरणीं वीर सन्धानीं च महौषधीम्॥ **6.101.32** ॥

सञ्जीवनार्थं वीरस्य लक्ष्मणस्य त्वमानय।
इत्येवमुक्तो हनुमान् गत्वा चौषधिपर्वतम्।
चिन्तामभ्यगमच्छ्रीमानजानंस्ता महौषधीः॥ **6.101.33** ॥

तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः।
इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः॥ **6.101.34** ॥

अस्मिंस्तु शिखरे जातामोषधीं तां सुखावहाम्।
प्रतर्केणावगच्छामि सुषेणो ह्येवमब्रवीत्॥ **6.101.35** ॥

अगृह्य यदि गच्छामि विशल्यकरणीमहम्।
कालात्ययेन दोषः स्याद् वैक्लव्यं च महद् भवेत्॥ **6.101.36** ॥

इति सञ्चिन्त्य हनुमान् गत्वा क्षिप्रं महाबलः।
आसाद्य पर्वतश्रेष्ठं त्रिः प्रकम्प्य गिरेः शिरः॥ **6.101.37** ॥

फुल्लनानातरुगणं समुत्पाट्य महाबलः।
गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत्॥ **6.101.38** ॥

स नीलमिव जीमूतं तोयपूर्णं नभस्तलात्।
उत्पपात गृहीत्वा तु हनूमाञ्शिखरं गिरेः॥ **6.101.39** ॥

समागम्य महावेगः सन्न्यस्य शिखरं गिरेः।
विश्रम्य किञ्चिद्धनुमान् सुषेणमिदमब्रवीत्॥ **6.101.40** ॥

औषधीर्नावगच्छामि ता अहं हरिपुङ्गव।
तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया॥ **6.101.41** ॥

एवं कथयमानं तु प्रशस्य पवनात्मजम्।
सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीः॥ **6.101.42** ॥

विस्मितास्तु बभूवुस्ते सर्वे वानरपुङ्गवाः।
दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करम्॥ **6.101.43** ॥

ततः सङ्क्षोदयित्वा तामोषधीं वानरोत्तमः।
लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः॥ **6.101.44** ॥

सशल्यः स समाघ्राय लक्ष्मणः परवीरहा।
विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात्॥ **6.101.45** ॥

तमुत्थितं तु हरयो भूतलात् प्रेक्ष्य लक्ष्मणम्।
साधुसाध्विति सुप्रीता लक्ष्मणं प्रत्यपूजयन्॥ **6.101.46** ॥

एह्येहीत्यब्रवीद् रामो लक्ष्मणं परवीरहा।
सस्वजे गाढमालिङ्ग्य बाष्पपर्याकुलेक्षणः॥ **6.101.47** ॥

अब्रवीच परिष्वज्य सौमित्रिं राघवस्तदा।
दिष्ट्या त्वां वीर पश्यामि मरणात् पुनरागतम्॥ **6.101.48** ॥

नहि मे जीवितेनार्थः सीतया च जयेन वा।
को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते॥ **6.101.49** ॥

इत्येवं ब्रुवतस्तस्य राघवस्य महात्मनः।
खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत्॥ **6.101.50** ॥

तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम।
लघुः कश्चिदिवासत्त्वो नैवं त्वं वक्तुमर्हसि॥ **6.101.51** ॥

नहि प्रतिज्ञां कुर्वन्ति वितथां सत्यवादिनः।
लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम्॥ **6.101.52** ॥

नैराश्यमुपगन्तुं च नालं ते मत्कृतेऽनघ।
वधेन रावणस्याद्य प्रतिज्ञामनुपालय॥ **6.101.53** ॥

न जीवन् यास्यते शत्रुस्तव बाणपथं गतः।
नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः॥ **6.101.54** ॥

अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः।
यावदस्तं न यात्येष कृतकर्मा दिवाकरः॥ **6.101.55** ॥

यदि वधमिच्छसि रावणस्य सङ्ख्ये
    यदि च कृतां हि तवेच्छसि प्रतिज्ञाम्।
यदि तव राजसुताभिलाष आर्य
    कुरु च वचो मम शीघ्रमद्य वीर॥ **6.101.56** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकाधिकशततमः सर्गः॥